
पञ्चमः पाठः

संख्यागणना ननु सरला

0672CH05




© NCERT not to be republished



एकः सूर्यः चन्द्रोऽप्येकः
मानवकुलमप्येकम्।
द्वे नयने ननु जीविनि सकले
प्रभवति सर्वो द्रष्टुम्॥





लोकशङ्करस्त्रिनयनमूर्तिः
नमाम्यहं तं प्रतिदिवसम्।
चतुर्मुखोऽयं जगतः स्रष्टा
तेन हि सृष्टं जीवकुलम्॥





पञ्चाङ्गुलयो मम करकमले
लोके विदधति गणनाम्।
सुरसेनानीः षण्मुखदेवः
सततं पात्ययममरगणम्॥






रवि		७	१४	२१	२८
सोम	१	८	१५	२२	२९
मंगल	२	९	१६	२३	३०
बुध	३	१०	१७	२४	३१
गुरु	४	११	१८	२५	
शुक्र	५	१२	१९	२६	
शनि	६	१३	२०	२७	

सप्त वासराः सप्ताहे ननु
स्वराः सुमधुराः सप्त।
ऊर्ध्वमधस्तात् लोकाः सप्त
ख्याता ऋषयः सप्त॥





© NCERT not to be republished

Reprint 2026-27



अष्ट दिग्गजा धरन्ति धरणीम्
उपकृतिशीला अतुलबलाः।
नव ग्रहा ननु विपुले गगने
चरन्ति सततं नियततया॥





पूर्वाद्या दश दिशः प्रसिद्धाः
सङ्ख्यागणना ननु सरला।
गायामो वयममितामोदं
कुर्मो बहुधा करतालम्॥

डॉ. जनार्दनहेगडे

वयं शब्दार्थान् जानीमः

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखन्तु
जीविनि	जीवे	प्राणी में	In the living being	
स्रष्टा	सृष्टिकर्ता ब्रह्मा	सृष्टिकर्ता ब्रह्मा	Creator of universe	
करकमले	हस्तारविन्दे	कमल जैसे हाथ में	In the lotus like hand	
विदधति	कुर्वन्ति	करते हैं	Facilitate	
गणनाम्	गणनम्	गिनती	Counting	
सुरसेनानीः	कार्तिकेयः	देवों के सेनापति (कार्तिकेय)	Commander-in-chief of Gods	
पाति	रक्षति	रक्षा करता है	Protects	
सप्ताहे	दिवससप्तके	सप्ताह में	In a week	

© NCERT not to be republished

Reprint 2026-27

शब्दः	अर्थः	हिन्दी	English	मातृभाषया अर्थं लिखन्तु
ऋषयः	मुनयः	ऋषि-गण	Sages	
ऊर्ध्वम्	उपरि	ऊपर	Above	
अधः	निम्नभागे	नीचे	Below	
उपकृतिशीलाः	उपकार-स्वभावाः	उपकार स्वभाववाले	Those who are of helpful nature	
अतुलबलाः	अतुल्यशक्ति-सम्पन्नाः	अतुलनीय बलवाले	Extraordinarily strong	
नियततया	नियमितरूपेण	नियमित रूप से	Continuously	
दिशः	दिशाः	दिशाएँ	Directions	
अमितामोदं	अत्यानन्दपूर्वकम्	अति आनन्दपूर्वक	With Great/ limitless delight	
करतालम्	करतलध्वनिः	ताली	Clap	

वयं संख्यां गणयामः (१ – ५०)

१ – एकम्	११ – एकादश	२१ – एकविंशतिः	३१ – एकत्रिंशत्	४१ – एकचत्वारिंशत्
२ – द्वे	१२ – द्वादश	२२ – द्वाविंशतिः	३२ – द्वात्रिंशत्	४२ – द्विचत्वारिंशत्
३ – त्रीणि	१३ – त्रयोदश	२३ – त्रयोविंशतिः	३३ – त्रयस्त्रिंशत्	४३ – त्रिचत्वारिंशत्
४ – चत्वारि	१४ – चतुर्दश	२४ – चतुर्विंशतिः	३४ – चतुस्त्रिंशत्	४४ – चतुश्चत्वारिंशत्
५ – पञ्च	१५ – पञ्चदश	२५ – पञ्चविंशतिः	३५ – पञ्चत्रिंशत्	४५ – पञ्चचत्वारिंशत्
६ – षट्	१६ – षोडश	२६ – षड्विंशतिः	३६ – षट्त्रिंशत्	४६ – षट्चत्वारिंशत्
७ – सप्त	१७ – सप्तदश	२७ – सप्तविंशतिः	३७ – सप्तत्रिंशत्	४७ – सप्तचत्वारिंशत्
८ – अष्ट	१८ – अष्टादश	२८ – अष्टाविंशतिः	३८ – अष्टात्रिंशत्	४८ – अष्टचत्वारिंशत्
९ – नव	१९ – नवदश	२९ – नवविंशतिः	३९ – नवत्रिंशत्	४९ – नवचत्वारिंशत्
१० – दश	२० – विंशतिः	३० – त्रिंशत्	४० – चत्वारिंशत्	५० – पञ्चाशत्

© NCERT not to be republished

Reprint 2026-27



वयम् अभ्यासं कुर्मः

१. पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु—

(क) कः एकः अस्ति? – .....

(ख) कः षण्मुखदेवः अस्ति? – .....

(ग) कः त्रिनयनमूर्तिः अस्ति? – .....

(घ) का सरला अस्ति? – .....

(ङ) के अतुलबलाः सन्ति? – .....

२. उदाहरणानुगुणं शब्दानां पुरतः उचितां संख्यां लिखन्तु—

यथा – आकाशे .....१..... सूर्यः विभाति। (१, २, ३, ४)

(क) मम हस्ते ..... अङ्गुलयः सन्ति। (९, ५, ८, ७)

(ख) सप्ताहे ..... वासराः भवन्ति। (६, १०, ७, ५)

(ग) कार्तिकेयस्य ..... मुखानि सन्ति। (१, ६, १०, ३)

(घ) व्याकरणे ..... वचनानि सन्ति। (१०, ९, ३, ५)

(ङ) गगने ..... ग्रहाः सन्ति। (८, ७, ९, १०)

३. उदाहरणानुसारं सङ्ख्यां सङ्ख्यापदं च लिखन्तु—

यथा – भवतः परिवारे कति जनाः सन्ति? .....५..... (.....पञ्च.....)

(क) कति दिशः सन्ति? ....., (.....)

(ख) सप्ताहे कति वासराः भवन्ति? ....., (.....)

(ग) वर्षे कति मासाः भवन्ति? ....., (.....)

(घ) भवतः कति दन्ताः सन्ति? ....., (.....)

(ङ) स्वराः कति भवन्ति? ....., (.....)

© NCERT not to be republished

Reprint 2026-27

४. अधः प्रदत्तेन पदेन सह सङ्ख्यां योजयन्तु—

अ		ब
(क)	पञ्च	२०
(ख)	एकम्	१३
(ग)	अष्ट	५
(घ)	विंशतिः	१
(ङ)	त्रयोदश	८

५. उपस्थितिपत्रं पश्यन्तु। संख्यां वदन्तु लिखन्तु च—



उपस्थिति-क्रमसंख्या	नाम
१ – एकम्	गणेशः
२ – द्वे	गीताञ्जलिः
३ – त्रीणि	जगन्नाथः
४ – चत्वारि	दिनेशः
५ – पञ्च	प्रज्ञा
६ – षट्	बलरामः
७ – सप्त	मोहनः
८ – अष्ट	राधिका
९ – नव	सुभद्रा
१० – दश	स्वयंप्रभा



(क) गणेशस्य उपस्थितिसंख्या का? .....

(ख) सुभद्रायाः उपस्थितिसंख्या का? .....

(ग) स्वयंप्रभायाः उपस्थितिसंख्या का? .....

(घ) जगन्नाथस्य उपस्थितिसंख्या का? .....


(ङ) बलरामस्य उपस्थितिसंख्या का? .....

© NCERT not to be republished


Reprint 2026-27


६. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे अङ्कैः च ताः संख्याः लिखन्तु—





७. चित्रं पश्यन्तु, संख्याः वदन्तु, द्वितीयचित्रे शब्दैः च ताः संख्याः लिखन्तु—





© NCERT not to be republished

Reprint 2026-27



योग्यताविस्तरः

संख्याप्रसिद्धिः

एकम् – एकं ब्रह्म

द्वे – द्वे अयने (उत्तरायणम्, दक्षिणायनम्)

त्रीणि – त्रीणि वचनानि (एकवचनम्, द्विवचनम्, बहुवचनम्)

चत्वारि – चत्वारि युगानि (कृतयुगम्, त्रेतायुगम्, द्वापरयुगम्, कलियुगम्)

पञ्च – पञ्च अङ्गानि (तिथिः, वासरः, नक्षत्रम्, योगः, करणम्)

षट् – षट् रसाः (मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः)

सप्त – सप्त ऋषयः (मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः)

अष्ट – अष्ट दिक्पालाः (इन्द्रः, अग्निः, यमः, निर्ऋतिः, वरुणः, वायुः, कुबेरः, ईशानः)

नव – नवग्रहाः (सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः)

दश – दश दिशाः (पूर्वदिशा, पश्चिमदिशा, उत्तरदिशा, दक्षिणदिशा, आग्नेयकोणः, नैर्ऋत्यकोणः, वायव्यकोणः, ईशानकोणः, ऊर्ध्वम्, अधः)



कार्यकलापः

संख्यागीतम्

एकं द्वे, एकं द्वे। पश्यत किमस्ति मम हस्ते।
त्रीणि चत्वारि, त्रीणि चत्वारि। हस्ते पात्रं, पात्रे वारि।
पञ्च षट्, पञ्च षट्। जम्बीररसं योजयत।
सप्त अष्ट, सप्त अष्ट। लवणं गुडं च मेलयत।
नव दश, नव दश। शनैः शनैः मन्थयत॥




© NCERT not to be republished

Reprint 2026-27



परियोजनाकार्यम्

चित्रे रिक्तस्थलेषु अङ्कैः संख्यां लिखन्तु—



© NCERT not to be republished

Reprint 2026-27